श्रीमते रामानुजाय नमः

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्सांकसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे।।

श्रीपराशरभट्टविरचित

।।श्रीरङ्गनाथतिरुमंजनकट्टियम्।।

अमृत-प्रभवं प्रभाप्रभाव प्रहतध्वान्तलसद्विलासजातम् ।
सकलं सकलानुमोदहेतुम् शशिनं त्वां कलयामि रङ्गराज ।। (१)

अनिशं कुमुदं विकासयन्तं
सततं पूर्णमहर्निशं च दृश्यम् ।
अनुपप्लवमद्य रङ्गराजं मनुते
चन्द्रमसं जनोऽनुमान्यम् ।। (२)

कुंकुमारुणमुदञ्चित श्रियम्
कोमलारुण सरोजसंस्थितम् ।
रङ्गमन्दिर ! तमोनिवारणम्
शंकते तपन दीधितिं जनः ।। (३)

भवन्तं श्रीमन्तं हसितकलिकालंकृतमिह
अशोकं कुर्वन्तं भ्रमरहितं अत्युत्सवकरम् ।
सुखस्पर्शाश्लिश्यत् पवनजमहानन्द भरितम्
वसन्तं रङ्गेश प्रकटसुमनस्कं मनुमहे ।। (४)



सत्पक्षपातात् भुवनाश्रयत्वात् सन्मानसावास निभाननत्वात् ।
पद्माश्रयत्वाच्च भवानिदानीम् हंसो यथा राजति रङ्गराज ।। (५)

अन्तः स्थितस्सुमनसां अमरेशरत्न
च्छाया विकल्पितरुचिः नयनाभिरामम् ।
आपातितस्मरगुणः प्रथितप्रचारः
शाखासु रङ्गनृपतिर्मधुपो विभाति ।। (६)

सार्धं द्विजैः श्रावणकर्म रङ्गिन्
कल्पोचित-स्नान विधिं करोषि ।
श्रुति-स्मृतिभ्यां व्यपदिश्यमानम्
स्वयं ममाज्ञां अनुवर्तयामि ।। (७)

समुन्मिषत् पद्मज-तार संश्रिता
तवावतार-क्रम पाठ-तत्परा ।
त्रयीव रङ्गेश समर्थ्यते जनैः
असौ जयन्तीत्युदितेयमष्टमी ।। (८)

अमृतमयमनन्तं सिद्धसर्वार्थजातम्
नियमित-सकलार्थं निश्चितात्मावबोधम् ।
किमिह बहु निरुक्तैः कीर्तनाभीष्टदं त्वाम्
निगममिव मनोज्ञं रङ्गराजाद्य मन्ये ।। (९)

श्यामाभं मकुटोपेतम् कटकाञ्चितमुन्नतम् ।
सत्त्वाश्रयं रङ्गराजम् महीधरमवैम्यहम् ।। (१०)

सत्त्वोन्नतस्सकल सत्त्व निवासभूमिः
सौवर्णरम्य विभवस्सुमनो मनोज्ञः ।
सद्वृत्तसङ्ग समधिष्ठित पार्श्वदेशः
शैलात्मना स्फुरसि रङ्गमहीश्वर ! त्वम् ।। (११)

अशेषाशापूर्तिं विदधतं अनेकैः स्वविभवैः
प्रसिध्यत् कल्याणं प्रकटतर पीताम्बर रुचिम् ।
कृतस्वास्थ्योत्सेधात् निखिलसुमनः प्रीतिजननम्
भवन्तं मन्येऽहं सुरशिखरिणं रङ्गनृपते ! ।। (१२)

मरकतमणिरम्यं रम्यमाणिक्यमुक्ता
फलविलसितगात्रं प्रस्फुरद् गन्धवाहम् ।
विहितविविधजन्तुं प्रोल्लसन्-मीनलीलम्
सुगमजलनिधिं त्वां मन्महे रङ्गराज ।। (१३)

मणिवररुचिवाही मत्स्यरूपं दधानो
ललित-धवळ-शंखोऽलङ्घयन्नेव वेलाम् ।
विधृत-भुवन-भारो वीक्ष्यसे रङ्गधामन्
अपर इव वपुष्मानापगानामधीशः ।। (१४)



नानानुवृत्ति विषयम् नतराजहंसम्
नानाण्डजात समधिष्ठितमब्जरम्यम् ।
सेवावतीर्ण सुमरुद्गणमद्य रङ्गिन्
भावानुरूप नदमित्यनुमन्महे त्वाम् ।। (१५)

वृत्तिर्वेगवती समाश्रित-जन-त्राणे भवच्चेतसः
ताम्रा कुंकुम-पत्रिका भुजतटी ते तुङ्गभद्रोज्ज्वला ।
रङ्गाधीश्वर ! नर्मदा च भणितिः शोणस्सुजातोऽधरः
तस्मात् स्नान विधौ जनो हि मनुते त्वाम् सर्वतीर्थात्मकम् ।। (१६)

अनेकशाखाश्रितमाश्रितेभ्यो
दत्ताधिकांशं त्रिदशैक भोग्यम् ।
सुपर्णरम्यं सुमनस्समेतम्
सुरद्रुमं त्वां सुधियो वदन्ति ।। १७

श्रीमत् सुरङ्ग-धरणीश ! विशालशाखम्
श्रीकौस्तुभस्फुरितमीप्सित-दान-दक्षम् ।
हंसादि सद्द्विज वरैरुपसेव्यमानम्
त्वां मन्महे सुरतरुं सुरनाथ नाथ ।। १८

अद्यायते लसति हल्लक-पुष्पमाला
वक्षस्थले विनिहिता तव रङ्गराज ! ।
स्वच्छन्दवारि कमलाचरणारविन्द
माणिक्य-नूपुर मयूख परम्परेव ।। १९

रङ्गेश रजनी-चर्चा राजते तव वक्षसि ।
देव्या हिरण्यवर्णायाः देहकान्तिरिवोत्थिता ।। २०

सर्वस्मात्-पर ! सांपराय-सवने शक्तिस्तवेच्छात्मिका
पत्नी पात्रगणश्च हेतिपतयः प्राप्तर्त्विजो बाहवः ।
पौलस्त्याः पशवो दशाननमुखाः रक्षाफलम् ज्ञानिनाम्
श्रीमन् ! मज्ञनकैतवादवभृथस्नातेव रङ्गेश्वर ! ।। २१

क्रियादर्शे दर्शे कृतमखविधीनामुपगते
प्रवृत्त-स्नानांस्त्वं परमुदयसे रङ्गतरणे ।
प्रकर्षेणोद्बुद्ध द्विजकुलमशेषं प्रतिदिशम्
प्रहृष्टा पद्मोर्वी भवति च जगत्-ध्वस्त-तिमिरम् ।। २२

चन्द्रार्कौ रङ्गधामन् ! श्रवणमुपागतौ चक्षुराकारयोगात्
मान्योऽमासङ्गमस्ते सदसि बहुमतो मित्रवारस्य योगः ।
कालोऽयं पुष्यदिष्टो भवति मयि महांस्त्वत्कटाक्षस्य पातः
त्वत्कान्त्यब्धेश्च सेतुः त्वमसि वयमिह प्राप्ततीर्था भवामः ।। २३

पद्माविद्युदलंकृताङ्गविभवं गंभीरनादाश्रयम्
सान्द्रेन्द्रोपलकांतिचोरवपुषं सन्ताप-विध्वंसिनम् ।
कारुण्याम्बुभराश्रयं विदधतं सच्चातकानां मुदम्
मान्यं मेघममोघपूर्णफलदं रङ्गाधिपं मन्महे ।। २४



त्वं मेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूल प्रमाणात्
एतज्ञानादि सिद्धादनुभव विभवात् तर्हि (सोऽपि) साक्रोश एव ।
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीस्स्यात्
हन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवत् त्वम् ।। (२५)

उत्तरीय-पटिका विराजते रङ्गराज ! भवतो भुजान्तरे ।
सत्पथे शतमखोपलप्रभे जाह्नवीव शरदभ्र-निर्मला ।। २६

पश्यत्सुरासुरगणं सुमनोविकास-
सत्सिद्धचारणसमूह निषेव्यमाणम् ।
संदृष्ट-चारुतर सारतरामृतौघम्
त्वां रङ्गराज ! कलयामि हि मन्दराद्रिम् ।। (२७)

इति श्रीरङ्गनाथ तिरुमंजनक्कट्टियम्

श्रीपराशरभट्टर् तिरुवडिगळे शरणम्

m.n.ramanuja
mannaram.tripod.com/ramanuja